# दिवाकरद्युतिः



वेदमार्तण्डाचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः

दिवाकरद्युतिः

(वेदमार्तण्ड-आचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः)

प्रकाशिका –
अर्वाचीनसंस्कृतसाहित्यपरिषद्
सी ६२, अक्षरधाम टेनामेन्ट्स,
मथुरानगरी समीप, अक्षरचोक,
वडोदरा, गुजरात. 390020
२०१६

ISBN :978-93-827 13-15-9

प्रतिलिपयः - ३००
प्रकाशनवर्षम् – २०१६
मूल्यम् – ५००
प्राप्तिस्थानम् – वेदनिकेतनम्, लुहागडजागा, शंकरानन्दमथलेन्
तिआडिसाहि, पुरी- ७५२००१ , ओडिशा
दूरभाषा- ०९४३७६९७५३०

मुद्रणम् – Pagemaker Computer Services
117, Bapuji Nagar, Bhubaneswar - 751009

| | | | |
|---|---|---|---|
| | राजशेखरश्च | | |
| 41 | दिवापि शिवतुष्ट्यै हि शिवरात्र्याः व्रतं कुरु | डॉ.पंङ्कज एस.रावल: | 134 |
| 42 | संस्कृतिशिक्षणे वैदिकनारीणां योगदानम् | बीउमामहेश्वरी. | 140 |
| 43 | वैदिकसंस्कारा:- एकं विश्लेषणात्मकमध्ययनम् | डॉ.विभूतिभूषणमहापात्र: | 148 |
| 44 | यज्ञ: | डॉ.चन्दनकुमारमिश्र: | 161 |
| 45 | वेदविचारे मीमांसादर्शनम् | डॉ. सन्तोषकुमार आचार्या: | 167 |
| 46 | यज्ञात्सूक्ष्मदैवशक्तेर्प्रादुर्भाव: | डॉ.कृपासिन्धुपण्डा | 170 |
| 47 | *कात्यायन – जैमिनिमतो: रथकारस्याधिकारविषये विश्लेषणम्* | श्रीशम्भुनाथमण्डल: | 172 |
| 48 | विविधभाष्यदृष्ट्या उपनिषदषु गस्वरूपम् | पलाशविश्वास: | 176 |
| 49 | वैदिकसाहित्ये अग्नि: | श्रीकल्याणीहार्दिक: | 181 |
| 50 | सर्वं यज्ञमयं जगत् | श्री उत्तमपाहाडी | 184 |
| 51 | वेदे समाजविज्ञानम् | श्रीनवकिशोरमिश्र: | 187 |
| 52 | कालिदासस्य साहित्ये वैदिकप्रभाव: | श्रीदुर्गाप्रसादमिश्र: | 190 |
| 53 | ब्राह्मणानां वेदत्वम् | विपासासामन्त | 194 |
| 54 | समयमयूखग्रन्थे निषिद्धकर्मविचार: | शुभश्री त्रिपाठी | 196 |
| 55 | वैदिकसाहित्ये राष्ट्रियभावना | दीप्तिप्रभासाहु | 200 |
| 56 | महाभाष्यकालीनसमाजः ; एकमध्ययनम् | स्वर्णलता पण्डा | 204 |
| 57 | *Vedic*-Research Methodology. | Pro.D.N.Pandeya | 211 |
| 58 | Some Aspects of Vedic Studies | Dr. Rabindra Kumar Panda | 220 |
| 59 | RTE and Beyond: An ICT Integrated Approach for Brighter Classrooms | Dr. Sanat Kumar Rath | 226 |
| 60 | Women in Vedic society | Dr.Satrughna Panigrahi | 237 |
| 61 | The Social value of the stories in the 3rd chapter of Satapatha Bramhan | Mamata Behera | 242 |
| 62 | The Portrayggal of Idyllic Environment in Vedas | PreetiPujara | 243 |
| 63 | Ecology as truly depicted in the Vedas: A Critique | Dr. N. C. Panda | 248 |

# संस्कृतिशिक्षणे वैदिकनारीणां योगदानम्

बी.उमामहेश्वरी

**"मातृमान् पितृमान् आचार्यवान् ब्रूयात्"**[1] यथा 'मतृमान्' इत्युक्ते **'यस्य विद्यते पुत्रस्य सम्यगनुशास्त्री'**[2](अनुशासनकर्त्री स मातृमान्), यं पुत्रं माता स्वयं शिक्षयति सः मातृमानिति वेदेषु गीयते। न केवलं मातृ अस्तित्वमात्रेण पुत्रः मातृमानिति उच्यते। अपि च पुत्रः स्वयं मात्रा शिक्षितः सः मातृमानिति कथ्यते। सा परम्परा वेदकालादारभ्य अद्यावधि प्रचलती अस्तीत्यनेन मन्त्रेण ज्ञायते।

**जननी प्रथमागुरुः जनकंवैद्वितीयकः।**
**तृतीयो लभ्यते लोके चतुर्थं प्रकृतीस्तथा॥**

जननी प्रथमा गुरुः इत्यत्र वेदव्यास,जाबालि ऋष्योः संवादः द्रष्टुं शक्यते। तन्मध्ये व्यासेनोक्तं त्रिषु लोकेषु मातृसमो गुरुः नास्तीति। यथा—

**"पितुरप्यधिकामाता गर्भधारणपोषणात्।**
**अतो हि सर्वलोकेषु नास्तिमातृसमो गुरुः॥**
**नास्ति गङ्गासमं तीर्थं नास्तिविष्णुसमो प्रभुः।**
**नास्तिशम्भुसमः पूज्यो नास्तिमातृसमो गुरुः॥**
**नास्तिचैकादशीतुल्यं व्रतं त्रैलोक्यविश्रुतम्।**
**तपो नानशनात्तुल्यं नास्तिमातृसमो गुरुः॥**
**नास्ति भार्यासमा मित्रं नास्ति पुत्रसमः प्रियः।**
**नास्ति भगिनीसमा मान्या नास्तिमातृसमो गुरुः॥**
**न जामातृसमं पात्रं न दानं कन्यया समम्।**
**न भ्रातृसदृशो बन्धुर्न च मातृसमो गुरुः"**[3]**॥**

---

1. बृहदारण्यकं, ब्रा.१, मन्त्र-२.

2. बृहदारण्यकं शाङ्करभाष्यम्।

3. बृहद्धर्मपुराणम् -ऊर्वकाण्डः, अध्यायः-२,श्लोकः-३३ तः ४७ पर्यन्तम्।(व्यास जाबाली संवादः।)

कपिलाय कालिदासाय व्यासायव्यासपुत्राय च प्रथमागुरुः मातुरेव हि। नारीणां गरिमा एषा केन वारयितुं शक्यते? वेदकालादद्यावधि शास्त्रे व्यवहारे ज्ञानवर्धने च भूरि योगदानमस्ति। यथा— विद्याधिष्ठात्री नारी सरस्वती, नारदसनकादिमुनीनां स्वयं बोधयित्री च। सृष्ट्यारम्भसमये ब्रह्मणः मुखात् नारदः बभूव। तं नारदं वाग्देवी ज्ञानमबोधयत्। तत्पश्चात् नारदः विरक्तस्सन् तपश्चर्यार्थम् अरण्यं जगाम। ततः पश्चात् विधातुः मुखात् सनकादि महर्षय उत्पन्नाः। तानपि मात्रा ब्राह्म्या ज्ञानमकारयत्। तेऽपि तद्ज्ञानेन व्यावहारिकजीवने अमनस्काः भूत्वा वनं जग्मुः।

एतद्दृष्ट्वा कमलसम्भवः आश्चर्यचकितः ताम् एवं मा विदधातु इति अवारयत्। सृष्ट्यारम्भे न वैराग्यस्यावश्यकतास्ति, अपि तु व्यावहारिकजीवनस्यावश्यकतास्ति तत् बोधयतु इति आदिशत्। तत्पश्चात्मात्रा दक्षादिप्रजापतीन् सृष्टिप्रवर्धनाय कार्यदक्षता कार्यकुशलता-ञ्चाबोधयत् । तेनैव ज्ञानेन दक्षादिप्रजापतयः सृष्टिप्रवर्धनमकरोत्। विषयादस्मादवगम्यते यत् सृष्टेः प्रारम्भादारभ्यापि पुत्रं बोधयितुं माता समर्थासफला च इति। एषा परम्परा अधुनातना न अपि तु सनातना एव। तथापि अद्यावधि प्रचलती वर्तते।

शम्भुपत्नी **गङ्गादेवी भीष्ममेवमेव ज्ञानमबोधयत्** तद्यथा— शापग्रस्तगङ्गादेवी शन्तनमहाराजमाश्रित्य अष्टवसूनुद्धर्तुकामा भूतलमवतीर्य सौन्दर्यरूपेण विजनप्रदेशे विचरन्ती आसीत्। तां सुन्दररूपां मोहितः शन्तनः(कानिचन नियमानवलम्ब्य) गान्धर्वविवाहमकरोत्। ततः पश्चात् एकमेकं स्वपुत्रं सप्तसङ्ख्यापर्यन्तम्, उत्पन्नक्षणानन्तरमेव जले पातयतिस्म।

ईदृशं दुश्चर्यचर्यं शन्तनः दृष्ट्वा सन्तापमनस्कः सप्तपुत्रपातनानन्तरम् अष्टमपुत्रं पातनसमये **"मा पातय, मा पातयेति"** अवारयत्। नियमभङ्गेन गङ्गा कृद्धाऽभूत्वा अवदत्, "मा चर, मा चर एवं सम्बन्धो नास्तीतःपरमावयोः" इति। तदा शन्तनः **"एनमष्टमपुत्रं नवजातशिशुं मां दीयताम्"** इति अप्रार्थयत्। तदा गङ्गादेवी, **"नैव नैवेदानीं दीयते पुत्रः भवते मया"**, यदैषः विविधविद्यानिष्णातः, नीतिधर्मशास्त्रपारङ्गतः, सकलकार्यकलाकुशलः भविष्यति तदा स्वयमेवाहूय त्वां प्रत्यर्पयामि इति।

ततःपश्चात् गङ्गादेवी भीष्मं, ताः सर्वाः विद्याः तथा संस्काराश्च सम्यगवबोध्य तं शन्तनायै प्रत्यर्पयत्। तया पाठितः शिक्षितः भीष्म आजीवनं निष्कलङ्केन आदर्शरूपेण च जीवितं यापितवान्। अस्य जीवनं **"लक्षश्लोकात्मिकमहाभारते वंशत्रये**

**अखण्डनायकरूपेण**"[4] एकपात्राभिनयमपुरूपेण अभासत्। ईदृश वैभवस्य कारणं किमितिचेत् "नारी"। दुरन्धरप्रकाण्डविद्वांसोऽपि एवम्भूतशिक्षणं न दातुं शक्नोति यथा नारी गङ्गादेवी स्वपुत्रमशिक्षयत्। ततःपरं समस्तनारीणामादर्शरूपेण गङ्गादेवी स्वपुत्रं सर्वगुणसम्पन्नं कर्तुं नारी समर्था इति अदर्शयत्।

एवञ्च **मार्कण्डेयपुराणे मदालसाचरित्रमपि** पुत्रशिक्षणे ज्ञानप्रसादने च आदर्शरूपी वर्तते। यथा हि— **ऋतुध्वजमहाराज्ञः पत्नी, गन्धर्वराजविश्वावसुनः पुत्री** च आसीत् मदालसा। सा आबाल्यादेव ब्रह्मचिन्तने कालं यापयतिस्म। यौवनकाले एकदा ऋतुध्वजः सुन्दररूपां तां दृष्ट्वा विवाहेच्छया गान्धर्वविवाहमकरोत्। ततःपश्चात् तयोः पुत्रः सञ्जातः। तस्य **विक्रान्तेति** नामकरणमकरोत्। तं पुत्रं प्रति ब्रह्मज्ञानमेव लालनरूपेण कृत्वा ब्रह्मज्ञानमबोधयत्।

तद्यथा—

> **"शुद्धोऽसि रे तात! न तेऽस्ति नाम कृतं हि ते कल्पनयाधुनैव।**
> **पञ्चात्मकं देहमिदं न तेऽस्ति नैवास्य त्वं रोदिसि कस्य हेतोः॥**
> **न वा भवान् रोदिति वै स्वजन्माशब्दोऽयमासाद्य महीशसूनुम्।**
> **विकल्प्यमाना विविधा गुणास्तेऽगुणाश्च भौताः सकलेन्द्रियेषु॥**
> **भूतानि भूतैः परिदुर्बलानिवृद्धिंसमायान्ति यथेह पुंसः।**
> **अन्नाम्बुदानादिभिरेव कस्यन तेऽस्ति वृद्धिर्न च तेऽस्ति हानिः॥**
> **त्वं कञ्चुकेशीर्यमाणे निजेऽस्मिंस्तस्मिंश्चदेहे मूढतां मा व्रजेथाः।**
> **शुभाशुभैः कर्मभिर्देहमेतन्मदादि मूढैः कञ्चुकस्ते पिनद्धः॥**
> **तातेति किंचित् तनयेति किंचिदम्बेति किंचिद्दयितेति किंचित्।**
> **ममेति किंचिन्न ममेति किंचित् त्वं भूतसङ्घं बहु मानयेथा॥**
> **दुःखानि दुःखोपगमाय भोगान्सुखाय जानाति विमूढ़चेताः।**
> **तान्येव दुःखानि पुनः सुखानिजानाति विद्वानविमूढ़चेताः॥**
> **हासोऽस्थिसंदर्शनमक्षि युग्ममत्युज्ज्वलं यत्कलुषं वसाया।**

---

[4]. महाभारतम्।

**कुचादि पीनं पिशितं पनं** तत्स्थानंरते: **किं नरकं न योषित्** ॥
**यानं क्षितौ यानगतश्च देहोदेहेऽपि चान्यः पुरुषो निविष्टः** ।
**ममत्वमुर्व्यां न तथा यथा स्वेदेहेऽतिमात्रं च विमूढ़तैषा** ॥
**धन्योऽसि रे यो वसु**धामशत्रुरेकश्चिरं पालयितासि **पुत्र** ।
तत्पालनादस्तु सुखोपभोगोधर्मात् **फलं प्राप्स्यसि** चामरत्वम् ॥
**धरामरान् पर्वसु तर्पयेथाःसमीहितं बन्धुषु पूरयेथा** ।
**हितं परस्मै हृदि** चिन्तयेथामनः **परस्त्रीषु निवर्तयेथाः** ॥
**सदा मुरारिं हृदि** चिन्तयेथास्तद् ध्यानतोऽन्त **षडरीञ्जयेथाः**।
**मायां प्रबोधेन** निवारयेथाह्यनित्यतामेव विचिन्तयेथाः ॥
**अर्थागमाय क्षितिपाञ्जयेथायशोऽर्जनायार्थमपि व्ययेथाः**।
**परापवादश्रवणाद्विभीथाविपत्समुद्राज्जनमुध्दरेथाः**"[5]॥इति। तेन संसारे विरक्तः विक्रान्तः सन्यासी अभवत्।

तदनन्तरं द्वितीयः पुत्रः **सुबाहुः** सञ्जातः। तमपि आबाल्यादेव ब्रह्मविद्यामबोधयत्। तेन सोऽपि संसारे विरागीभूत्वा तपश्चरणार्थमरण्यं जगाम। ततः तृतीयपुत्र **अरिमर्दनः**, तमपि ब्रह्मज्ञानं सुबोध्य संसारे विरागिं कृतवती। एतत्सर्वं दृष्ट्वा चकितः ऋतुध्वजः मदालसामर्थितवानादिष्टवांश्च यथा—**"सर्वे पुत्राः विरागिणः भवेयुः तर्हि राज्यभारं कोऽनुभिभर्तयति?"** इति।

तदा मदालसा **अलर्कनामधेयं चतुर्थं पुत्रंराजधर्मानबोधयत्** अलर्कः मातृबोधनानुरूपेणैव **धर्मतः** राज्यमपालयत्। अन्ते मातृद्वारेणैव ज्ञानं प्राप्य विरक्तो बभूव। विषयेऽस्मिन्नप्यवगम्यते यत् माता यथा पुत्रं शिक्षयितुमिच्छति तथैव शिक्षितुं परिवर्तयितुञ्च समर्था भवतीति।

---

[5].मार्कण्डेयपुराणम्, पृ.सं.१०७.
संक्षिप्तमार्कण्डेय-ब्रह्मपुराणाङ्कः, इक्कीसवें वर्ष का विशेषाङ्क, 'कल्याण'-कार्यालय, गीताप्रेस-गोरखपुर।

मातृशिक्षणे एतावत्प्रभावं वयं सर्वत्र द्रष्टुं शक्नुमः। यथा जिजियाभाई स्वपुत्रं छत्रपतिशिवाजिमहाराजानं स्तन्यपानसमयादारभ्यैव वीरपराक्रमपौरुषराजधर्मान् देशभक्तिञ्च अबोधयत्। अनाथरूपेण पोषितः शिवाजिमहोदयः मातृशिक्षणेन महाराजवत् जीवनं परिवर्त्य पालितवान्। जिजियायाः शिक्षणम् अद्यापि सर्वैः जनैः प्रशंसते। केवलं पुत्रपालने शिक्षणदानमेव न अपि तु स्वयं ज्ञानिनः स्त्रिय अपि दृश्यन्ते यथा—गार्गी, मैत्रेयीत्यादयः। तत्र गार्गी विषयेऽधुना पश्यामः।

मिथिलाधिपतिः राजा जनकः एकदा ब्रह्मसभामायोजितवान्। तत्सभायां बहवः ऋषयः, मुनयः, ब्रह्मवेत्तारश्च आगतवन्तः। जनकः ब्रह्मसभासदानुद्दिश्य एवमवोचत्— **"यो ब्रह्मवरिष्ठः, तेन सुवर्णालङ्कृत गो सहस्रान् नेतुं शक्यते"** इति। तदा, तत्र कोऽपि ताः गाः ग्रहीतुं नोद्युक्तः। तदा याज्ञवल्क्यः उत्थाय स्वशिष्यानादिदेश, **"नयन्तु गाः तेभ्यः"** इति। एवं वक्तारं याज्ञवल्क्यं दृष्ट्वा अन्ये ब्रह्मवेत्तारः कृद्धाः सन्तः प्रश्नशरसन्धानं कर्तुमुद्युक्तवन्तः। तत्र प्रथमं आश्वलमुनिः पप्रच्छ। **"कथं भवान् ब्रह्मवरिष्ठः भवितुमर्हती"**ति मम प्रश्नस्य समाधानं दीयताम् इति, अनेकप्रश्नान् पृष्टवान्। याज्ञवल्क्यः प्रश्नानामनुरूपम् उत्तरं दत्तवान्। तेन आश्वलः सन्तोषेण उपरराम। इत्थ**मार्तभागः, भुजुः, उषस्तः, कहोलः, आरुणीत्यादयः** अनेकप्रश्नान् पप्रच्छुः। तेषां सर्वेषामपि सानुभवेन शास्त्रानुरीत्या च समाधीय, सर्वान् पश्यन् आसीत्।

तन्मध्ये ब्रह्मचारिणी वाचक्नवी गार्गी उवाच— **"हे भगवन्तः! अधुना एनं द्वौ प्रश्नौ प्रष्टुकामास्मि यदि अनुज्ञा वर्तते तर्हि, तेन प्रश्नद्वयस्य समाधानं दीयते तर्हि एनं न कोपि पराजेतुं शक्नोति"** इति। तदा ब्राह्मणैरुक्तं **'प्रच्छे'**ति। तदा गार्गी याज्ञवल्क्यमुद्दिश्य, **"हे याज्ञवल्क्य! द्युलोकादूर्ध्वं पृथ्वीलोकादधः, द्वयोर्मध्ये द्वौ अपि च कस्मिन् ओतम्प्रोतञ्चे"**ति। तदा याज्ञवल्क्येनोक्तम् **"आकाशे"** इति। स आकाशः कस्मिन् ओतप्रोतञ्चेति? याज्ञवल्क्येनोक्तम् **अक्षरपरब्रह्मणि** ओतप्रोतमिति प्रश्नद्वयस्योत्तरं दत्तवान्।

तदा गार्गी समस्तसभासदानुद्दिश्य अवदत्, **"अयं ब्रह्मिष्ठः"** विषयेऽस्मिन् न संशयलेशः। किं बहुना अलं प्रश्नैः; नमस्कारयोग्यः सम्माननीयश्च याज्ञवल्क्य इत्युक्त्वा उपरराम। ततः विदग्धशाकल्यः गार्गिवचनमनादृत्य प्रष्टुमुद्युक्तवान्। कतिपयप्रश्नानन्तरं विदग्धशाकल्यस्य शिरः शतधा अभवत्। एका नारी अबला गार्गी प्रकाण्डविद्वन्मण्डले याज्ञवल्क्यं ब्रह्मवेत्तारं

स्थालीपुलीकन्यायेन प्रश्नद्वयेनैव अजानत्। उक्ता च धीरवचसा **"न केनापि पराजेतुं शक्यते"** इति। एतस्याः धैर्यमभिनन्दनीयमेव। अद्यापि तत्तुल्या नास्तीति वचने नैवाश्चर्यः। पाण्डित्ये कौशल्ये धैर्ये तर्कवितर्के च गार्ग्याः जीवनं समस्तनारीणां आदर्शप्रायमित्यवगम्यते।

**"जन्मदाता चतुर्मुखः बुद्धिदात्री सरस्वती।**
**शङ्करः प्रथमो वक्ता तथा श्रोता च पार्वती"॥**

अष्टादशपुराणेषु अन्यप्राचीनग्रन्थेषु च प्रप्रथमवक्ता महेश्वर एव। जगज्जननी माहेश्वरी श्रोतारूपेण दृश्यते। अनन्तकालादनेकप्रश्नान् पार्वतीदेवी पृच्छन्ती एव असीत्। यतो हि ज्ञानस्यानन्तत्वात्। माता यदा संशयापन्ना भवति, सद्यः महेश्वरं पृच्छति स्म। अनेन सर्वदा पार्वती परमेश्वरात् ज्ञानम् आर्जयति स्म। अनयोः संवादः बहुत्र पुराणेतिहासेषु दृश्यते। एवमेव मैत्रेयीयाज्ञवल्क्यसंवादोऽपि बृहदारण्यकोपनिषदि दरीदृश्यते।

तत्र केचन, ब्रह्मज्ञानार्थं नारी अनधिकारीति, किन्तु मैत्रेयीयाज्ञवल्क्यसंवादेनैव तदसदिति ज्ञायते। याज्ञवल्क्यस्य द्वे भार्ये आस्ताम्। ते कात्यायनी, मैत्रेयी च। स गार्हस्त्याश्रमं समाप्य सन्यासाश्रमं गन्तुमिच्छति स्म। अतः कात्यायनीं मैत्रेयीञ्चाहूय स्वमनोगतविषयं प्रकाशयत्, "युवां सन्यासाय अनुज्ञां दीयताम्, अपरञ्च गृहेस्थितधनं द्विधा विभज्य, इतः गन्तुकामोऽस्मी"ति। तदा कात्यायनी तथैवेत्युक्ता, किन्तु मैत्रेय्याः रुचिः विभाजितधने न आसीत्।

**"सा होवाच मैत्रेयी। यन्न म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति नेति होवाच। याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति[6]"** तया पृष्टं याज्ञवल्क्यं, हे भगवन्! धनधान्यसमृद्धसमस्तपृथिव्या अहम् अमृतत्त्वं विन्दे ? उत न ?। तदा याज्ञवल्क्येनोक्तं, **"नैव अमृतत्त्वं प्राप्यते वित्तेन। केवलं सुखकरं जीवनं भवति** इति। तदा मैत्रेयी— **"येनाहं नामृता स्यां किमहं तेन कुर्यां?, यदेव भावान् वेद तदेव मे ब्रूही"[7]**ति।

---

[6]. बृहदारण्यकोपनिषद्, अध्यायः-२,चतुर्थब्राह्मणे मन्त्रः-२.

[7]. बृहदारण्यकोपनिषद्, अध्यायः-२,चतुर्थब्राह्मणम्।

यद्धनेन अमृतत्त्वं न प्राप्यते तदनावश्यकं मम इति। अनेन ज्ञायते यत् "याज्ञवल्क्यस्य धनद्वयं विद्यते, लौकिकधनम्, अलौकिकधनञ्चेति। अत्र केवलं लौकिकधनं विभज्य गन्तुमिच्छतिस्म। किन्तु मैत्रेयी ज्ञानधनमपि वाञ्छतिस्म। ततः याज्ञवल्क्येन मैत्रेयीं ज्ञानं बोधयित्वा चतुर्थाश्रमं जगाम।

ततः पश्चात् अष्टावधानं कर्तुं पण्डिताः बहुप्रयत्नं कुर्वन्ति। किन्तु नारी सहजजीवने अष्टावधानम् अनुदिनं करोतीति प्रसिद्धं लोके। ग्रामीणनारी यथा गृहस्याङ्गने धान्यं कुट्टयति स्म। कथं तस्या अष्टावधानमित्यधुना पश्यामः—

१ **हस्ताभ्यां धान्यं कुट्टयति।** (एकवारं दक्षिणहस्तेन एकवारं वामहस्तेन च)

२ **पद्भ्यां धान्यमुन्नयति** ( पादेन धान्यं मुसलसमीपं क्षेपयति।)

३ **श्रोतृभ्यां पुत्ररोदनं श्रृणोति।** (समीपे पर्यङ्के स्वपुत्रः रुदन्नस्ति।)

४ **अक्षिभ्यां काकान्निवारयति।** (किञ्चिद्धान्यं आङ्गने प्रसारितमस्ति। तद्धान्यं काकेभ्यः दृष्टिमात्रेण रक्षयति।)

५ **मुखात् सल्लपति सहेलिना।** (तत्पार्श्वे सहेली धान्यं समीकरोति, तया सह सल्लपति।)

६ **मुसलात् पादं रक्षयति।** (मुसलप्रसारात् स्वपादं रक्षयति।)

७ **मनसि विचिन्तयति।** (भोजने किं पाचनीयमिति।)

८ **मध्ये मध्ये शाटिकाग्रेन श्वेदं मार्जयति।** (कुट्टनायासेन निर्गतस्वेदं मार्जयति।)

अनुदिनं नारीजीवनम् एवमेव वर्तते, न तु एकस्य जीवनमेतादृशं सर्वासां नारीनां वर्तते। अत एवोक्तं **"कार्येषु दासी, करणेषु मन्त्री"** इत्यादय उक्तयः। अर्थात् कार्यकरणसमये दासी इव कार्यं करोति। विपत्तिकाले मन्त्रिवत् बहुधा विचिन्त्य कुशलेन कार्यं करोति। अत एव बुधैः स्त्रीणामत्यन्तम् उन्नतस्थानं दत्तम्।

**उपसंहारः**

सृष्टेः मूलभूताः मातृमूर्तयः। विना स्त्रिया गतिर्नास्ति, विना स्त्रिया मतिर्नास्ति, विनास्त्रिया उन्नतिर्नास्ति, विना स्त्रिया जीवनं नास्ति, विना स्त्रिया सृष्टिरेव नास्तीत्यार्यवचनम्। स्वर्गकामोऽपि पुरुषः स्त्रिया विना गन्तुं न शक्नोति। तत्र मनुनाप्युक्तम्

**"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः"**[8] इति।

वेदकाले नारीणां योगदानम् बहुत्र दृश्यते। तासां मन्त्राः बहवः लभ्यन्ते। नारी वेदेषु ऋषिका नाम्ना व्यपदिष्यते। देवगुरुः बृहस्पत्याः पुत्री रोमशायाः मन्त्राः ऋग्वेदस्य अष्टममण्डले एकनवतिकाण्डे प्रथमादारभ्य सप्तमपर्यन्तं दरीदृश्यन्ते। **शश्वती** अपि ऋग्वेदस्य ऋचस्येकस्य ऋषिका वर्तते। एषा **अङ्गीर ऋषेः पुत्री** आसङ्गराज्ञः **पत्नी** च आसीत्। ऋग्वेदस्याष्टममण्डलस्य प्रथमसूक्तौ ३४(चतुस्त्रिंशत्) मन्त्रस्य ऋषिका वर्तते। दीर्घतम ऋषेः माता **ममता** आसीत्। अस्याः मन्त्राः अग्नेस्तुतिपाठकाः प्रसिद्धाश्च। ते ऋग्वेदस्य प्रथममण्डलस्य दशमसूक्तौ वर्तन्ते। एवमेव बह्व्य ऋषिकाः वेदेषु दरीदृश्यन्ते। अनेनावगम्यते स्त्रीणां संस्कृतसंस्कृतिशिक्षणे कीदृशं योगदानं वर्तते इति।

**सन्दर्भग्रन्थसूची**

१. ऋग्वेदः-चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली।

२. बृहदारण्यकोपनिषद्, सानुवादशाङ्करभाष्यम्(खण्ड-४), गीताप्रेस्-गोरखपुर्।

३. मार्कण्डेयपुराणम्, संक्षिप्तमार्कण्डेय-ब्रह्मपुराणाङ्कः, इक्कीसवें वर्ष का विशेषाङ्क, 'कल्याण'-कार्यालय, गीताप्रेस्-गोरखपुर्, वर्षम्-१९४७।

४. महाभारतम्, पण्डितरामनारायणशास्त्री पाण्डेयः, गीताप्रेस्-गोरखपुर्।

५. मनुस्मृतिः, सम्पादकः-गङ्गानाथ झा, परिमल् पब्लिकेशन्, दिल्ली।

६. नारी-अङ्क, गोविन्द भवन-कार्यालय, गीताप्रेस-गोरखपुर, वर्ष-१९४८।

असि.प्रो.न्यायदर्शनम्

श्री सोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरातम्।

[8]. मनुस्मृतिः।